International Journal of Sanskrit Research 2021; 7(6): 14-21

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(6): 14-21
© 2021 IJSR
www.anantaajournal.com
Received: 10-09-2021
Accepted: 14-10-2021

**अनीशः राघवन्**
संस्कृतविभागा, पावडिचेरी
विश्वविद्यालया, पांडिचेरी, भारत

Corresponding Author:
**अनीशः राघवन्**
संस्कृतविभागा, पावडिचेरी
विश्वविद्यालया, पांडिचेरी, भारत

# व्यक्तिविवेके प्रारम्भश्लोकानां विमर्शः

**अनीशः राघवन्**

**DOI:** https://doi.org/10.22271/23947519.2021.v7.i6a.1541

## भूमिका

भारतस्य प्राचीनशास्त्रग्रन्थेषु तथा काव्येषु स्वाभिधेयव्यतिरिक्तं साधारणलोकव्यवहारस्य विभिन्नतत्त्वानां तथा नैकविषयाणां ज्ञानं निरन्तरं प्रतिपादं प्रतिपदं च लभ्यते। भारतदेशस्यालङ्कारशास्त्रपरम्परायां काव्यं हि शास्त्रीभूय कान्तासम्मिततया रामादिवद्वर्तितव्यं न रावणादिवदिति धर्मोपदेशमादधत् पुरुषार्थानां लाभे अनुकूलीभवति। तस्मादेव मम्मटविरचितस्य काव्यप्रकाशग्रन्थे यथा काव्यप्रयोजनप्रसङ्गे *व्यवहारविदे कान्तासम्मिततयोपदेशयुजे* इति सुस्पष्टमिदमुदितं विद्यते, तथैव कविपक्षापेक्षिते काव्यकारणप्रसङ्गेऽपि *लोकशास्त्रकाव्याद्यवेक्षणात् निपुणता* इति कथितं भवति येन हेतुना कविः काव्येनोपदेष्टुं योग्यः स्यात्।[1]

परन्तु काव्येषु कविविषयकाः स्वजीवनभूता वृत्तान्ताः तत्स्वभावगताः सूचनाः वा प्रगूढभावेन तद्वचनाच्छन्ना भवन्ति। अतः ताः कष्टेन वा विरलमेव पाठकानां दृष्टिपथमाप्नुवन्ति। काव्यस्य तथा शास्त्रस्य मुख्यांशो भवतु, तल्लेखनस्य समयः, कवेः शास्त्रकारस्य वा मानसस्थितिः स्वभावश्च न तथा प्रतिभाति यथा तस्य शास्त्रतत्त्वानि तद्वैदग्ध्यं वा प्रस्फुटं लक्ष्यन्ते। बहुत्र सुविदग्धकवीनामपि स्वकीयात् काव्यात् तच्छास्त्रपाण्डित्यं पूर्णरूपेण नावगम्येत । तथैव शास्त्रकाराणां क्वचित् कवित्वमपि स्यात् यस्य प्रतीतिः स्वशास्त्रचर्चाडम्बरे गौणीभूयानवलक्षितं भवेत्। अपि च कदाचित् शास्त्रे लक्ष्यमाणानि खण्डनपुरस्सराणि शास्त्रकारस्य वचनानि यद्यपि मल्लन्यायेन समुच्चरितानि स्युः, छात्राणां प्रतीतौ शास्त्रकारस्य किमपि असामान्यं प्रोद्धतगुणं पुरोभागित्वं वा आभासयेरन्।

---

[1] काव्यप्रकाशः- शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥3॥

एवं कविविषयकोऽयं सज्ज्ञानं यद्यपि शास्त्रस्य मुख्यांशात् स्पष्टतया लब्धुं कठिनं भवेत्, क्वचित् शास्त्रारम्भे विद्यमानेषु श्लोकेषु संलब्धुं सुलभतरम् इति मन्ये। यतः तत्र अनुबन्धचतुष्टयतत्त्वैः साकं शास्त्रकारस्य ग्रन्थलेखनगताः भावनाः, तदवस्था, तस्य श्रद्धादिगुणाः स्वपद्यवचनेषु स्फुटतरं प्रतिबिम्बितानि भवन्ति। तथैव शास्त्रकारस्य कवित्वं कवनप्रतिभानं वापि अध्येतृप्रतीतिगोचरं विशदतरं समायाति।

अतः अस्मिन् पत्रेऽहम् अलङ्कारशास्त्रे सुप्रसिद्धस्य व्यक्तिविवेकग्रन्थस्य प्रारम्भश्लोकान् विमृष्य तेषु तत्प्रणेतृमहिमभट्टविषयकाणि तत्त्वानि यथामति प्रस्तोतुमग्रे सविनयं प्रयते।

**अलङ्कारपरम्परायां व्यक्तिविवेकः**

प्राचीनालङ्कारिकाणां गुणरीत्यलङ्कारप्रधाना सिद्धान्तपरिपाटी आनन्दवर्धनविरचितध्वन्यालोकप्रभावेन ध्वनितत्त्वमुररीकृत्य काव्यतत्त्वं नवीनरीत्या प्रकाशयति। तत्र अभिनवगुप्तप्रभृति आ जगन्नाथपण्डितं ध्वनितत्त्वं, तत्प्रवर्तिनी व्यञ्जनावृत्तिश्च, प्रायः सर्वैरपि परवर्तिभिरालङ्कारिकैः सविशेषमङ्गीकृत्य स्वकृतिषु प्रकाशितम्। अपि तु महिमभट्टविरचिते व्यक्तिविवेके नवीनैरनुज्ञातस्य व्यञ्जनावैलक्षण्यस्य खण्डनमेव प्रमुखविषयः। अभिनवगुप्तरुय्यकयोरनन्तरकाले विरचितोऽयं ग्रन्थः[2] व्यक्तिः इति अभिधेयं व्यञ्जनाव्यापारं विवेकपुरस्सरम् प्रसिद्धपूर्वे अनुमानव्यापारे अन्तर्भावयन् *व्यक्तिविवेकः* इति सुप्रसिद्धः।

व्यञ्जनानुमानयोः विवेककारकोऽयं ग्रन्थः विमर्शत्रयेण विभाजितः। तत्रादौ प्रथमविमर्शो भवति *ध्वनिलक्षणाक्षेपः* इति। यत्र महिमभट्टः ध्वन्यालोकगतस्य ध्वनिलक्षणस्य पौनरुक्त्यसङ्गत्यादिदोषान् प्रकाशयन् व्यञ्जनान्तर्भावकस्य अनुमानस्य विषयगतं स्वकीयसिद्धान्तं प्रतिष्ठापयति। ततः द्वितीयविमर्शः *शब्दानौचित्यविचार* इति नाम्ना ज्ञातः यत्र शब्दार्थयोः औचित्यपुरस्सरं गुणदोषाः विवेच्यन्ते। अन्ततः *अन्तर्भावोपदर्शनो* नाम तृतीयविमर्शो ध्वन्यालोकात् प्रायशः ध्वनिनिर्देशकानि चत्वारिंशदुदाहरणानि उद्धृत्य तेषु अनुमानव्यापारसिद्धिं साधयन् अयं ग्रन्थः स्वविषयमुपसंहरति।

**व्यक्तिविवेककारस्य परिचयः**

श्रीधैर्यसूनुः महाकविश्यामलशिष्यः काश्मीरवास्तव्यो राजानको महिमभट्टो हि व्यक्तिविवेकाख्यस्य ग्रन्थस्य रचयिता।[3] अपि च व्यक्तिविवेकग्रन्थे कतिपयोल्लेखानुसारं महिमभट्टः प्रायः अभिनवगुप्तकुन्तकयोः समकालवर्ती किञ्चित् परवर्ती वेति ज्ञायते।[4] तथैव रुय्यकलिखितव्याख्यानमाश्रित्य महिमभट्टः अभिनवगुप्तरुय्यकयोरन्तरकाले एकादशशताब्दस्योत्तरार्धे हि जिजीवेति साधयितुं शक्यम्। व्यक्तिविवेकातिरिक्तं महिमभट्टेन *तत्त्वोक्तिकोशः* प्रणीतः इति व्यक्तिविवेकग्रन्थे एव सूचितः[5]। तथैव, व्यक्तिविवेकाध्ययनेन महिमभट्टस्य अलङ्कारशास्त्रातिरिक्तं नैकशास्त्रेषु पाण्डिती स्फुटं दरीदृश्यते।

महिमभट्टस्यायं परिचयः तच्छास्त्रे लभ्यमानाभिः सूचनाभिः अनुमीयते तथेतरालङ्कारिकाणां ग्रन्थेषु तद्विषयोद्धारैः परोक्षतया ज्ञायते। परन्तु यदि कोऽप्यंशः शास्त्रे प्रवर्तेत यत्र कविः स्वस्य विषये अपरोक्षभावेन कथयेत्, सः अंशो भवति प्रारम्भश्लोकानां प्रसङ्गः। यतः शास्त्रारम्भे विद्यमाना एते श्लोका अनुबन्धचतुष्टयं व्यतिरिच्य बहुत्र पूर्वपीठिकां भूमिकां वा रचयन्ति, यस्मिन् कविवषयकानि तत्त्वानि स्फुटतरं राजन्ति।

---

[2] Vyaktiviveka- A Critical Study - The foregoing discussion enables us to assign Mahimabhatta to the period immediately after Abhinavagupta and prior to Ruyyaka.

[3] Ibid. p. 41 …he was a disciple of Mahakavi Shyamala.

[4] Ibid. His manner of reference to Abhinavagupta and Kuntaka suggests that he was a contemporary of them…

[5] व्यक्तिविवेकः 2.119 – शास्त्रे तत्त्वोक्तिकोशाख्ये इति नेह प्रपञ्चितम्॥ 119॥

व्यक्तिविवेकग्रन्थे षट् श्लोका आदौ वर्तन्ते, यान् वयमग्रे क्रमेण पूर्वोक्तहेतोः समालोचयामः।

**विमर्शः**

तत्रादिमः श्लोको भवति-

**अनुमानेऽन्तर्भावं सर्वस्यापि ध्वनेः प्रकाशयितुम्।**
**व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम्॥1॥**[6]

अयं श्लोको ग्रन्थस्य मङ्गलाचरणम्। व्यक्तिविवेकव्याख्याकारो रुय्यकोऽपि *"ग्रन्थारम्भे ग्रन्थकारः* शिष्टाचारमनुस्मरन्नुचितदेवताप्रणामपुरस्सरं स्वप्रवृत्तिप्रयोजनमाचष्टे" इति स्पष्टीकरोति।[7] तथा हि श्लोकस्य पूर्वार्धे व्यक्तिविवेककरणस्य मूलप्रयोजनम् उद्घोष्यते। तत् किल सर्वस्यापि ध्वनेः अनुमाने अन्तर्भावं प्रकाशयितुम् इति । तत्र *सर्वस्यापि ध्वनेः* इति वचनेन न केवलं काव्यानुमानस्याव्याप्तिं निवारयन् निरवशेषतया तस्य अनुमानेऽन्तर्भावं कथयति, अपि तु स्वस्य ध्वन्यालोकप्राप्तं ध्वनिज्ञानमपि पूर्णभावेन सम्पन्नमिति सूचयति। यतः ध्वनिकारः स्वयमेवाह-

**एवं ध्वनेः प्रभेदाः प्रभेदभेदाश्च केन शक्यन्ते।**
**सङ्ख्यातुं दिङ्मात्रं तेषामिदमुक्तमस्माभिः ॥ इति।**[8]

एवञ्च सामान्यतः अविवक्षितवाच्यविवक्षितान्यपरवाच्यौ इति भेदद्वयादारभ्य असङ्ख्यभेदवान् ध्वनिरिति आनन्दवर्धनस्य मतं सूचयन् महिमभट्टः सर्वस्यापि ध्वनेः इति वचनेन स्वसिद्धान्तप्रस्तावे दार्ढ्यम् असन्दिग्धतां च द्योतयति। न केषाञ्चिदेव ध्वनिप्रकाराणाम् अनुमानेऽन्तर्भावः अपि तु तस्य असङ्ख्यप्रकाराः सर्वेऽपि अनुमाने एव अन्तर्भवन्तीति ग्रन्थे सविस्तरं चर्चितं ध्वन्यपेक्षयानुमानस्य महाविषयत्वं सर्वस्य इति पदेन प्रारम्भे एव महिमा स्फष्टं वदति। प्रकाशयितुम् इति पदेन ध्वनेः अनुमानान्तर्भावस्वभावताप्युक्ता। यतः प्रकाशनं सत एव भवितुमर्हति। एवं ध्वनेः अनुमानान्तर्भावोऽपि न केवलं विवेच्यते, सम्भाव्यते वा, अपि तु अज्ञानान्धकारवशात् येषां प्रतीत्यगोचरो भवति, तेषां कृते प्रकाश्यते इत्याशयः।

श्लोकस्योत्तराङ्गे परां वाचं प्रणम्य महिमा व्यक्तिविवेकं कुरुते इति परादिचत्वारिवाक्सु सर्वोन्नतां पराभिधानां वाणीं नमस्कोरति। अत्र परां वाचं इत्युक्तेः श्रेष्ठां वाणीमित्यपि मम्मटाचार्यस्य दिशा वक्तुं शक्यते। यथा काव्यप्रकाशमङ्गलाचरणेऽपि नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्रां नवरसरुचिरां निर्मितिम् आदधती कवेः भारती जयतीति नमस्क्रियते।[9]

प्रायः महिमभट्टस्याशयो भवति चत्वारिवाक्सु प्रधाना परा । यतः काश्मीरशास्त्रकाराणामियं परानमस्कृतिः दरीदृष्यते। यथा हि समकालवर्तिनः अभिनवगुप्तस्य लोचनटीकायामपि मङ्गलान्ताः शास्त्राणि इति न्यायेन विरचिते प्रथमोद्योतस्यान्त्यश्लोके *तां वन्दे प्रतिभां शिवाम्* इति वन्दितेयं प्रतिभाख्या शिवा, काश्मीरशैवसिद्धान्तानुसारं परां शक्तिमेव सूचयति।

महिमा इति व्यक्तिविवेककारेण स्वनाम उच्चारितम्। यद्यपि आनन्दवर्धनेन ध्वन्यालोके *सहृदयानामानन्दो मनसि लभतां प्रतिष्ठाम्*[10] इति वाक्ये स्फुटभावेन स्वनोमोच्चारणं न कृतम्, अभिनवगुप्तस्तु स्वव्याख्यायाम् *आनन्द इति ग्रन्थकृतो नाम*[11] इति कथयति। तदनु *तेन स आनन्दवर्धनाचार्य एतच्छास्त्रद्वारेण सहृदयहृदयेषु देवतायतनादिवदनश्वरीं स्थितिं गच्छत्विति भावः*[12]इति नामोच्चारणमपि दृढं समर्थयति।

---

[6] व्यक्तिवेकः,1.1

[7] व्यक्तिविवेकव्याख्यानम्, पृ.1

[8] ध्वन्यालोकः 3.44

[9] काव्यप्रकाशः- नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति॥1.1॥

[10] ध्वन्यालोकः, पृ.37

[11] लोचनम्, पृ.41

[12] तत्रैव

एवं प्रायः समकालवर्तिनः अभिनवगुप्तस्य लोचनव्याख्यानप्रेरितः व्यक्तिविवेककारोऽपि आनन्दवर्धनं वैमत्येनाभिमूखीकर्तुं समानशैल्या महिमा इति नामप्रयोगं कुर्यात्। अथवा इयं काचित् तत्कालिनसामान्यपरम्परा स्यात्, यतः रुय्यकोऽपि व्यक्तिविवेककारस्य नामप्रयोगं अभिनवगुप्तव्याख्यातस्य समानरीत्या समर्थयति यथा *महिमेति नामपदं कीर्त्यर्थमिति* [13]।

एवमिदं नमस्क्रियात्मकं मङ्गलाचरणं न केवलं शास्त्रप्रयोजनं सूचयति अपि तु व्यक्तिविवेककारस्य सिद्धान्तदृष्टिं ध्वनिपरिचयं तथा तत्कालसमवर्तिनां रीतिं परम्परां च द्योतयति।

**युक्तोऽयमात्मसदृशान् प्रति मे प्रयत्नः**
**नास्त्येव तज्जगति सर्वमनोहरं यत्।**
**केचिज्ज्वलन्ति विकसन्त्यपरे निमील-**
**न्त्यन्ये यदभ्युदयभाजि जगत्प्रदीपे॥**.[14]

अयं कश्चित् रुचिरः श्लोको यस्मिन् महिमभट्टः स्वशास्त्रस्याधिकारिणमस्मभ्यो बोधयन् स्वसिद्धान्तोत्कृष्टत्वं भङ्ग्या सूचयति। स्वस्य शास्त्रकरणेऽयं प्रयत्नः न मुधेति मुख्याशयः। अत्र कारणद्वयं सूचितम्। आदौ तावद् अयं ग्रन्थः आत्मसदृशान् उद्दिश्य प्रणीत इति हेतोः तेषामपि अस्मिन् शास्त्रे समानाभिनिवेशः बोधः आनन्दश्च भविता। अतः अत्र तेषां ज्ञानानन्दलाभेन प्रयोजनेन सार्थको ह्ययं यत्नः इति महिमभट्टस्य विचारः।

ननु अन्येषामेतद् अमनोहरमिति कारणाद् नायं यत्नो युक्तः स्यादित्याशङ्कायाम् उच्यते, यत् सर्वमनोहरं तत् जगति नास्त्येवेति। अयमेव तत्त्वम् अभिनवगुप्तोऽपि लोचनटीकायां *यदाहुः भिन्नरुचिर्हि लोकः* इति वाक्येन सूचयति। अपि तु तत्र अभिनवगुप्तोऽपि ध्वननव्यापारमनुमापकत्वव्यापारेण स्वीकार्यमाणान् पूर्वपक्षानुद्दिश्यैव पूर्वोक्तवाक्यं कथयति। यथा- यस्तु *ध्वनिव्याख्यानोद्यतस्तात्पर्यशक्तिमेव विवक्षासूचकत्वमेव वा ध्वननमवोचत्, स नास्माकं हृदयमावर्जयति। यदाहुः भिन्नरुचिर्हि लोकः* इति।[15]

अत्र ध्वननव्यापारम् अनुमापकत्वव्यापारेण स्वीक्रियमाणाः अभिनवगुप्तसम्बोधिताः के इति अद्यावधि सम्यग् न ज्ञायते। यतः अनुमापकत्वसिद्धान्तिनो महिमभट्टस्य व्यक्तिविवेकग्रन्थो लोचनटीकानन्तरमेव ग्रथित इति पण्डितानां साधारणं मतम्[16]। तथापि अभिनवगुप्तोक्तात् अस्मात् वाक्यात् ज्ञायते यद् अनुमानाश्रितः सिद्धान्त अवर्तत यो अन्ततः सर्वथा तर्कमात्रेण खण्डितो न भवितुमार्हत्। यतः तं तच्छास्त्रकारस्य दृष्ट्यनुरूपं साधयितुमपि शक्यम्। अत एव महान् पण्डितः अभिनवगुप्तोऽपि अस्मिन् प्रसङ्गे *नास्माकं हृदयमावर्जयति* [17] इति स्वास्वीकारं प्रकटयन्, *यदाहुः भिन्नरुचिर्हि लोकः* इति चर्चामुपसंहरति। यथा आङ्ग्लभाषायामपि Let us agree to disagree इत्युक्तिः लोकानां दृष्टिवैविध्यस्याङ्गीकारेऽपि अन्यमतास्वीकारं सूचयति।

व्यक्तिविवेकस्य प्रस्तुतश्लोकेऽपि अयमेव भावः अनुमानसिद्धान्तिनः पक्षात् समानरीत्या कथित इति मन्ये। केवलमत्र श्लोकाश्रितवचनं भङ्ग्या सालङ्कारमीरितं भवति। तथा हि - समानरुचिवन्तो हि आत्मसदृशा येषां प्रत्यसौ यत्नः। यतः जगति नैवं किमपि लभ्यते यत् सर्वानुमोदितं स्यात्।

महिमभट्टो न केवलं रुचेर्भिन्नतां सामान्यतया सूचयति, अपि तु विशिष्टं विषयं प्रति विविधजनानां विविधप्रतिक्रियाः सूचयन् तद्भेदं श्लेषाश्रितेन दृष्टान्तेन वक्ति। यथा –

**केचिज्ज्वलन्ति विकसन्त्यपरे निमीलन्त्यन्ये यदभ्युदभाजि जगत्प्रदीपे॥**.[18]

---

[13] व्यक्तिविवेकव्याख्यानम्, पृ.1

[14] व्यक्तिविवेकः, 1.2

[15] लोचनम्, पृ.40

[16] History of Sanskrit Poetics p.139

[17] लोचनम् पृ.40

[18] व्यक्तिविवेकः 1.2

उदयति सूर्ये केचित् सूर्यकान्तमणयः ज्वलन्ति, अपरे वारिजवृन्दा विकसन्ति अन्ये कुमुदादयः निमीलन्ति। अत्र एकं वस्तु अन्यस्मात् निकृष्टमुत्कृष्टं वा नास्ति। सर्वस्य प्रसिद्धविशेषसौन्दर्यात्। अपि तु प्रत्येकं वस्तुनः सूर्यं प्रति भिन्नमनोहारित्वं वर्तते।

एवं श्लेषेण शास्त्रपक्षेऽपि समुदिते जगत्प्रदीपे व्यक्तिविवेकप्रकाशके ज्ञाने केचित् क्रोधेन ज्वलन्ति, अपरे प्रमोदेन सानुमोदं विकसन्ति अन्ये च अनुत्साहेन अस्वीकारेण वा निमीलन्ति। एवमत्र ज्वलनकोपकरणभावानां बिम्बप्रतिबिम्बोक्त्या *दृष्टान्तः पुनरेतेषां (साधारणधर्मादीनां) सर्वेषां प्रतिबिम्बनम्* [19] इति लक्षणानुसारं दृष्टान्तालङ्कारः वर्तते। एवं व्यक्तिविवेककारस्य कवित्वं निरूपितं भवति।

*एतच्च गुणगर्वाध्मातमात्मानमुद्दिश्य भङ्ग्या कथितम्* [20]इति रुय्यकः महिमभट्टमाक्षिपति। अयमाक्षेपश्च प्रायः व्यक्तिविवेकस्य जगत्प्रदीपेन सूर्येण साम्यत्वप्रतिपादनात्। परन्त्विदं कथनभङ्गीमात्रमिति मन्ये। यतः नात्र अपरमतानुसारिणः निन्दिताः प्रत्युत तेषां प्रसिद्धमूल्यकैः सूर्यकान्तकुमुदैः साम्यत्वं सूचितम्। अस्मिन् श्लोके तु अभिनवगुप्तेन लोचने समुक्तं *भिन्नरुचिर्हि लोकः* इति तात्पर्यमेव प्रधानमिति मन्ये। अपि च अग्रिमश्लोकेषु व्यक्तिविवेककारस्य विनयगुणोऽपि स्फुटं ज्ञायते। अतः यद्यपि आपाततोऽयं श्लोकः ग्रन्थकारस्य दर्पं सूचयेत् तथापि वस्तुतः *न किमपि सर्वस्य मनोहरम्* इति व्यक्तिविवेककारस्य सुपरिपक्वचिन्तनानुभूतं वास्तविकं सत्यमेव प्रकाशयतीति मे मतिः।

अग्रे महिमभट्टस्य स्वपूर्वपक्षभूतमपि आनन्दवर्धनं प्रति विद्यमानो बहुमानः तथा स्वकीयो विनम्रभावः विशदं प्रकटीकृतः। यथा-

**इह सम्प्रतिपत्तितोऽन्यथा वा ध्वनिकारस्य वचोविवेचनं नः।**
**नियतं यशसे प्रपत्स्यते यन्महतां संस्तव एव गौरवाय॥**.[21]

अस्मिन् ग्रन्थे ध्वनिकारकथनाङ्गीकारेण अनङ्गीकारेण वा अस्मत्कृतो ध्वनिकारवचसो विवेचनं ध्रुवं यशसे प्रपत्स्यते इति मुख्याशयः। पूर्वोक्तं विशेषाशयं समर्थयितुं यत् महतां संस्तवः परिचयो वा गौरवाय इति अर्थान्तरन्यासालङ्कारयुक्तं साधारणगतं वाक्यमिदं महिमभट्टस्य उक्तिचातुर्यं द्योतयति।

इहापि व्यक्तिविवेककारेण पूर्वश्लोकप्रकाशितो नैजः सुपरिपक्वभावः वितन्यते। यतः शास्त्रियस्तरे सम्मतिरसम्मतिर्वा केवलं हि विनयोद्भूतानां सुपरिपक्वहृदाम् अन्योन्यबहुमानं न कलुषयति। अपराणां तु शत्रुत्वं शास्त्रस्तरात् दैनन्दिनस्तरेऽपि प्रवर्तेत। पुनः बहुमाने सत्यपि स्वदृष्टेः कथनमनुचितमिति न। यतः स्वानुभूतं नवीनरीत्या स्वदृष्ट्या च प्रकटीकरणमपि भारतीयसारस्वतपरम्परायाः माहात्म्यं, यस्मिन् पूर्वमतभिन्ने स्वमतेऽपि पूर्वाचार्येषु तन्मतेषु सम्मानः कदापि न निवर्तते। एवं वाङ्मयजगति इदं सारस्वतस्वातन्त्र्यं (Intellectual freedom), द्वेषध्वान्तेनाकलुषितं केवलं सुपरिपक्वमतिनां प्रभवति। इत्थम्भूतमतिमान् महिमभट्ट इति श्लोकादस्मात् स्फुटं ज्ञायते।

अस्मिन् श्लोके ध्वनिकारस्य *वचोविवेचनम्* इति स्थाने ध्वनिकारस्येति पदस्य वचः इति पदेन साकम् अन्वयः विवक्षितः। परन्तु तद् वचोविवेचनयोरेकार्थीभावात् विवेचनमिति पदेन साकं प्राधान्यादन्वितमिति प्रतीयते। एवं, व्यक्तिविवेकव्याख्याकारो रुय्यकोऽपि ध्वनिसिद्धान्तवादी महिमभट्टप्रतीकूलः दोषमिमं दर्शयन् *ध्वनिकृद्वाक्यविवेचनं तदेतादिति* शुद्धपाठं यच्छन् प्रारम्भे एव महिमभट्टस्य स्खलनं सवैलक्षण्यं सूचयति [22]। अन्ये आधुनिकव्याख्याकारा अपि प्रायः दोषं स्वीकुर्वन् रुय्यकोपदर्शितं पन्थानमनुसरन्ति। परन्त्वत्र श्लोकस्य दोषपरिहाराय भिन्नान्वयेन पठनं हि यथायथमिति मे मतिः। यतः महिमभट्टस्य व्याकरणपाण्डित्यं सुमहदित्यस्मिन् ग्रन्थे विविधस्थानेषु उद्धृतानि

---

[19] काव्यप्रकाश 10.102.

[20] व्यक्तिविवेकव्याख्यानम् पृ1.

[21] व्यक्तिविवेकः 1.3.

[22] व्यक्तिविवेकव्याख्यानम् पृ.1. यथास्थितपाठे तु ध्वनिकारस्येति वचश्शब्दान्वितमिष्यमाणं प्राधान्याद्विवेचनशब्दान्वितं प्रतीयते। एतच्चास्य साहित्यविचारदुर्निरूपकस्य प्रमुख एव स्खलितमिति महान् प्रमादः॥

व्याकरणतत्त्वानि मुहुर्मुहुः समर्थयन्ति। अतः एतादृशानां सामान्यसमासप्रसङ्गस्खलनं न स्वाभाविकम्। अथ च, दोषे सत्यपि भारतीयपरम्परायां स्थितस्य गतिश्चिन्तनीयेति न्यायेन कश्चित् समाधानः अन्वेषणीयः। अतः, अत्र ध्वनिकारस्य इति पदस्य सम्प्रतिपत्तितः इति पूर्वोक्तेन पदेन अन्वयो यद्यङ्गीक्रियते तदा, न केवलं दोषो परिहृतः अपि तु प्रथमविमर्शस्य वस्तुदृष्ट्यापि श्लोकार्थः युक्ततरः स्यात्।

यतः ध्वनिखण्डनप्रसङ्गे महिमभट्टो ध्वनिकारोक्तं व्यङ्ग्यव्यञ्जकभावं खण्डयति। एवं ध्वनिकारस्य असम्प्रतिपत्तिः अस्वीकारो वा प्रकाशितः।[23] परन्तु तस्मिन् खण्डनेऽपि शब्दार्थानां कार्यकारणक्रमं दर्शयन् स्वसिद्धान्तं ध्वनिकारोक्तिमेवाश्रित्य साधयति।[24] एवं ध्वनिकारस्य सम्प्रतिपत्तिः अनुकूलता अपि दर्शिता। अतः *ध्वनिकारस्य आनन्दवर्धनस्य सम्प्रतिपत्तितः असम्प्रतिपत्तितो वा नः वचोविवेचनं अभिधादिव्यापारान्वितवचनविवेचनं नियतं यशसे प्रपत्स्यते* इति अर्थो सुष्ठुतरो दोषहीनश्च भाति।

अग्रिमश्लोकद्वये व्यक्तिविवेककारस्य कवित्वं विनम्रता, तथा शास्त्रप्रसङ्गे स्वस्य पृष्टभूमिश्च असिन्दिग्धतया ज्ञायते।

**सहसा यशोऽभिसर्तुं समुद्यतादृष्टदर्पणा मम धीः।**
**स्वालङ्कारप्रकल्पविकल्पने वेत्ति कथमिवावद्यम्॥**
**ध्वनिवर्त्मन्यतिगहने स्खलितं वाण्याः पदे पदे सुलभम्।**
**रभसेन यत् प्रवृत्ता प्रकाशकं चन्द्रिकाद्यदृष्ट्वैव॥**[25]

इदं श्लोकद्वयमपि समासोक्त्यलङ्कारशोभितं व्यक्तिविवेककारस्य प्रतिभाप्रौढतां प्रकाशयति। *परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः* इति समासोक्त्यलङ्कारस्य लक्षणम्[26]। तदनुसारं समासोक्त्यलङ्कारान्विते श्लोके विशेष्यपदं विहाय तद्विशेषणानि श्लिष्टानि भवतः कमपि अप्रकृतार्थमपि समासेन संक्षेपेण वा सूचयन्ति। अतः एतादृशपद्यस्य समुल्लासेन अत्युत्तमा प्रतिभापेक्षिता भवति, या व्यक्तिविवेककारस्य अवर्ततेति इमौ श्लोकावेव प्रमाणौ।

आदिमश्लोके प्रकृतार्थगतं विशेष्यपदं भवति धीः इति । तथैव द्वितीयश्लोके प्रकृतार्थगतं मुख्यपदं भवति वाण्याः इति। अपि तु श्लोकद्वयेऽपि अन्यपदानां श्लेषसम्पदा कस्याचिदभिसारिकायाः अप्रकृतार्थः समासेन उक्तो भवति।

तथा हि आदिमश्लोके - *मम धीः सहसा यशः अभिसर्तुम् अदृष्टदर्पणा समुद्यता स्वालङ्कारप्रकल्पविकल्पने कथमिव अवद्यम् वेत्ति* इति अन्वयः। अत्र अदृष्टदर्पणा समुद्यता इति विशेषणे व्यक्तिविवेककारधीसम्बन्धस्य प्रकृतार्थस्य पक्षे अदृष्टहृदयदर्पणग्रन्थाः तथा यशो लब्धुं सिद्धा इति अर्थाभ्याम् अन्वेताम्। तथैव स्वालङ्कारविकल्पप्रकल्पने इति समस्तपदमपि स्वालङ्कारशास्त्रतत्त्वस्य यथायथविरचने इत्यर्थे गृह्यते। अपि तु अप्रकृतार्थस्य अभिसारिकानायिकापरस्य पक्षे *समुद्यता अदृष्टदर्पणा* इति विशेषणे अभिसर्तुमुत्सुका तथा अदृष्टमुकुरबिम्बा इति अर्थाभ्यां नायिकायाः दशां सूचयताम्। तथैव *स्वालङ्कारविकल्पप्रकल्पने* इति समस्तपदं पक्षेऽस्मिन् स्ववेशभूषादिकस्य समीचीनस्थापने इत्यर्थे युज्यते। एवं व्यक्तिविवेककारस्य धीः त्वरितं यशः प्राप्तुं सिद्धा ध्वनिखण्डनपरं भट्टनायकप्रणीतं हृदयदर्पणग्रन्थं न दृष्टवती, स्वस्य अलङ्कारशास्त्रतत्त्वनिरूपणे दोषं कथमिव जानीयात् इति प्रकृतार्थः। सहसा स्वप्रियम् अभिसर्तुमुत्सुकाभिसारिका नायिका, मुकुरमपि न दृष्टवती, स्वभूषणानां सुयुक्तधारणे दोषं कथमिव जानीयादिति समासेनोक्तः अप्रकृतार्थः। एवं व्यक्तिविवेककारस्य धीः

अभिसारिकानायिकासमा इत्येव तात्पर्यं सूचितं भवति।

---

[23] व्यक्तिविवेकः पृ.10 ...सहभावभ्रान्तिमात्रकृतस्तत्रान्येषां व्यङ्ग्यव्यञ्जकभावाभ्युपगमः, तन्निबन्धनश्च ध्वनिव्यपदेशः।

[24] व्यक्तिविवेकः पृ.11 वाच्यप्रतीयमानयोरर्थयोर्यथा क्रमेणैव प्रतीतिर्न समकालं यथा चानयोर्गम्यगमकभावः तथा तेनैव व्यक्तिवादिना तयोः स्वरूपं निरूपयितुकामेनाप्युक्तं तदेवस्माभिः समाधित्सुभिरिह लिख्यते परम्।

[25] व्यक्तिविवेकः 1.4 , 1.5

[26] काव्यप्रकाश 10.97

आगामिश्लोकेऽपि महिमभट्टस्य वाणी अभिसारिकानायिकासमा इति तात्पर्यं समासोक्तिमहिम्ना समरीत्या सूचितं भवति यतः विशेषणानि ध्वनि-अरण्ययोरुभयोरपि पक्षे अन्वितानि। तथा हि- प्रकृतार्थस्य पक्षे, अतिगहने दुर्ज्ञेये ध्वनिवर्त्मनि वाण्याः महिमभट्टोक्तेः पदे पदे प्रतिशब्दं स्खलनं दोषो वा सुलभं भवति। यतः सा वाणी चन्द्रिकादिध्वन्यालोकव्याख्यानादिकं तदर्थप्रकाशकम् अदृष्ट्वा रभसेन व्यक्तिविवेकग्रन्थरूपेण प्रवृत्ता इति भावः। तदेव नायिकापक्षे अतिगहने वनसन्निभे दुर्गमे वर्त्मनि तस्याः पदे पदे प्रत्यङ्घ्रिपाते स्खलनं पतनं वा सुलभम्। यतः सा चन्द्रिकादिकं ज्योत्स्नादिकं प्रकाशकम् अदृष्ट्वा रभसेन अभिसरणकौतुकत्वरया प्रवृत्ता अभिसर्तुमुपक्रान्ता इति अप्रकृतार्थः सूचितः।

एवं श्लोकद्वयेऽपि महिमभट्टः स्वग्रन्थे दोषसम्भावनां तद्धेतुगतम् अपरग्रन्थव्याख्यानाध्ययनं च निःसङ्कोचं स्फुटं कथयति। एवं च ग्रन्थग्रथनसमये अलङ्कारशास्त्रप्रसङ्गे स्वपृष्ठभूमिं विनम्रतयाङ्गीकरोति। इतः ज्ञायते यदयं न केवलं खण्डनार्थं वा स्वकीर्तिमात्रार्थं वा व्यक्तिविवेकं रचयति अपि तु किमपि निजबुद्धौ स्फुरितं तत्त्वं लोकाय स्थापयितुमेव इच्छति। अन्यथा आदावेव स्वशास्त्रे दोषसम्भावानायाः कथनं तथा स्वानध्ययनस्योद्घोषणं मुधा वा स्वप्रयोजनविरुद्धमेव वाभविष्यत्। अपि तु महिमभट्टस्य प्रयोजनं भवति केवलं स्वसिद्धान्तसम्बद्धस्य तत्त्वस्य निष्कपटप्रकाशनम्। अतः स्वग्रन्थे दोषे सत्यपि स्वस्य सिद्धान्तस्य मूलतत्त्वमुक्तं स्यादित्येव भावः अस्माभिरवगम्यते। एवं स्वयत्नो वृथा न भवतीत्येव तात्पर्यम्। इमं तात्पर्यं च महिमभट्टः स्वश्रेष्ठकवित्ववशात् समासोक्तिप्रयोगेन सूक्ष्मं सूचयति। तथा हि- स्वधीः स्ववाणीं वा समासोक्तिभङ्गीभणित्या अभिसरणोद्यतया नायिकया उपमाति। एवं नायिकायाः सहसाभिसरणात् दर्पणादर्शनं स्वालङ्कारविकल्पप्रकल्पनस्याज्ञानं तथा अभिसरणे च चन्द्रालोकितपथाननुसरणं पथि स्खलनं चैतत् सर्वं यद्यपि दोषाः भवन्ति तथापि रतिभावप्रसङ्गे काव्यादौ शृङ्गाररसस्वारस्यमेव वर्धयन्ति। तथैव ग्रन्थलेखनेऽपि आपाततो दोषा अपि अन्ततः ग्रन्थवैशिष्ट्यायैवेति सूक्ष्मं सूचयति महिमभट्टः। एवं महिमभट्टस्य प्रतिभाप्रौढता कथनचातुर्यं च सुविलक्षणमित्येव ज्ञायते।

तथापि दोषाः दोषा हि भवन्ति, अपि च मानवयत्नेषु कथमपि सम्भवन्त्येव। किञ्च, विशेषे सुयुक्ते तत्त्वे सति, ते दोषाः विद्वद्भिः अवधीर्याः इति प्रार्थनया शास्त्रचर्चारम्भात् प्राक् अन्त्यं श्लोकं रचयति ग्रन्थकारः यथा-

**किन्तु तदवधीर्यार्यैः गुणलेशे सततमवहितैर्भाव्यम्।**
**परिपवनवदथवा ते जात्यैव न शिक्षितास्तुषग्रहणम्॥**[27]

किन्तु आर्यैः तत् वाण्याः स्खलितादिकम् अपरिगणय्य स्वल्पे विद्यमाने गुणेऽपि सदा अवहितैः दत्तावधानैः भाव्यम्। अथ वा नैतत् वक्तव्यमेव, यतः ते शूर्पवत् प्रकृत्या एव निरुपयुक्तधान्यभागग्रहणं न शिक्षिताः अभ्यस्ताः वेति श्लोकस्य मुख्यभावः।

अत्र पुनः महिमभट्टस्य विनयः, बहुदोषे सत्यपि गुणान्वेषणपरता (Positive outlook) तथा दृष्टान्ताश्रितम् उक्तिचातुर्यं च दृश्यन्ते।

अस्मिन् श्लोके वैधर्म्यदृष्टान्तमूलः अलङ्कारो वर्तते इति प्राक्तनटीकाकारस्य रुय्यकस्य तथा आधुनिकटीकाकारस्य मधुसूदनशास्त्रिणोऽपि स्वीकृतिः। यतः नैते आर्याः परिपवनवदिति परिपवनस्य आर्यापेक्षया वैधर्म्यं भवत्येव। परन्तु प्राक्तनटीकाकारमते अलङ्कारो भवति व्यतिरेकः[28]। यतः उपमानभूतस्य परिपवनस्य तुषग्रहणशिक्षया आर्यभूताद् उपमानाद् न्यूनत्वमुक्तं यत् रुय्यकविरचिते अलङ्कारसर्वस्वे व्यतिरेकालङ्कारलक्षणया यथायथं युज्यते[29]। मधुसूदनशास्त्रिणो मते अत्र आक्षेपालङ्कारो हि भवति। यतः- आर्यैः गुणलेशे

[27] व्यक्तिवेवकः, 1.6

[28] व्यक्तिविवेकव्याख्यानम्, पृ.1 - वैधर्म्यदृष्टान्तमूलो व्यतिरेकः॥

[29] अलङ्कारसर्वस्व 29. उपमानादुपमेयस्याधिकगुणत्वे विपर्यये वा भवेत्।

अवहितैः भाव्यमिति उक्तेः पश्चाद् किं मया वक्तव्यम् – न ते परिपवनवदिति पूर्वोक्तेः निषेधः सूचितः इति शास्त्रिणः विचारः[30]। इतः अवगम्यते यत् प्राक्तनटीकाकारार्थं श्लोकेऽस्मिन् परिपवनस्य उपमानत्वं प्राधान्यमवाप। अपि तु मधुसूदनशास्त्रिणः कृते *अथ वा* इति पूर्वोक्तवाक्यस्य निषेधमूलं सूचनं हि प्रधानं भवति। पक्षद्वयेऽपि व्यक्तिविवेककारस्य कवित्वे उक्तिचातुर्ये च न कापि विप्रतिपत्तिः सम्भवितुमर्हति।

## उपसंहार

व्यक्तिविवेकग्रन्थस्य प्रथमाः षट् श्लोकाः न केवलं शास्त्रस्यानुबन्धचतुष्टयं ज्ञापयन्ति, अपि तु व्यक्तिविवेककारस्य गुणान् स्वभावं तत्कालस्थितिं तन्मनोऽवस्थां च विशदीकुर्वन्ति। एवं शास्त्रे अनुभूतस्य महिमभट्टगुणस्य युक्ता भूमिका भवन्ति एते प्रारम्भिकश्लोकाः। शास्त्रमात्रेण अनवगता महिमभट्टस्य विनम्रता, तथैव पूर्वाचार्यपूजा, सिद्धान्तस्थापने परिपक्वता, लक्ष्यस्पष्टता च एतैः श्लोकैः स्फुटं कथिताः। एवं साधारणतः खण्डनप्रवृत्तिपरिचितं महिमभट्टम् इमे श्लोकाः नवीनप्रकाशेन दर्शयन्ति इत्येव मे मतिः। किञ्च, शास्त्रकारस्यास्य कवित्वमपि एतैः पद्यैः सर्वजनज्ञेयं भवति। तस्माद् एषां श्लोकानां सावधानपठनानन्तरं व्यक्तिविवेकशास्त्रस्य पाठः अवश्यं महिमभट्टस्याशयबोधने तत्सिद्धान्तावगमने वा कामपि उदारतां जनयिष्यतीति निश्चप्रचमिति नातिपल्लवितेनेति शम्।

## ग्रन्थसूची


1. आचार्य विश्वेश्वर सिद्धान्तशिरोमणि, (2009) काव्यप्रकाशः, आज भवन, वाराणसी
2. जगन्नाथ पाठक (1965) ध्वन्यालोकः (लोचनव्याख्योपेतम्), चौखम्बा विद्याभवन, वाराणसी
3. त. गणपतिशास्त्रि (1909) व्यक्तिविवेकः (व्यक्तिविवेकव्याख्यानोपेतम्), तिरुवनन्तपुरम् राजकीयमुद्रालयः
4. मधुसूदनशर्मिश्र (1936). व्यक्तिविवेकः (मधुसूदनीविवृत्युपेतम्), चौखम्बा संस्कृत पुस्तकालय बनासर सीटि
5. चन्द्रकला आर्. कोण्डी (2017) व्यक्तिविवेकः (प्रथमो विमर्शः), शारदाम्बाप्रकाशनम् शङ्करपुरम्, शृङ्गेरी
6. रेवाप्रसाद द्विवेदी (1971) अलङ्कारसर्वस्वम्, चौखम्बा, वाराणसी

आङ्ग्लग्रन्थाः

1. Sushil Kumar De. History of Sanskrit Poetics, New Bharatiya Book Corporation Delhi 2014.
2. Rajendran C. Vyaktiviveka (A Critical Study), New Bharatiya Book Corporation 2003.


---

[30] मधुसूदनीविवृतिः पृ.7 ...आर्यपरिपवनौ गुणग्रहणकणग्रहणे अर्थतो दृष्टान्तीकृत्य पुनः तुषस्य (दोषस्य च) ग्रहणं निषिद्धमिति वैधर्म्यदृष्टान्तमूल आक्षेपः।